Remove Watermark Wondershare PDFelement

# Sri Baglamukhi Panjar Stotram
# श्री बगला-पञ्जर स्तोत्रम्

Swami Sandipendra Ji
942594119
contact@sandipendra.com
www.sandipendra.com



यह अति गोपनीय व रहस्यपूर्ण पञ्जर स्तोत्र अति दुर्लभ तथा परीक्षित है। इस पञ्जर का जप अथवा पाठ करने वाला साधक प्रत्येक क्षेत्र में सफलता का सोपान करता है। घोर दारिद्रय व विघ्नों के नाशक इस स्तोत्र का पाठ करने

Remove Watermark Wondershare PDFelement

वाले साधक की माँ बगला स्वयं रक्षा करती हैं। अरिदल साधक को मूक होकर देखते रह जाते हैं।

**विनियोग : ॐ अस्य श्रीमद् बगलामुखी पीताम्बरा पञ्जररूप स्तोत्र मन्त्रस्य भगवान नारद ऋषिः, अनुष्टुप छन्दः, जगद्वश्यकरी श्री पीताम्बरा बगलामुखी देवता, ह्लीं बीजं, स्वाहा शक्तिः, क्लीं कीलकं मम परसैन्य मन्त्र-तन्त्र-यन्त्रादि कृत्य क्षयार्थे श्री पीताम्बरा बगलामुखी देवता प्रीत्यर्थे च जपे विनियोगः।**

**ऋष्यादि-न्यास :**

**भगवान नारद ऋषये नमः शिरसि।**

**अनुष्टुप छन्दसे नमः मुखे।**

**जगद्वश्यकरी श्री पीताम्बरा बगलामुखी देवतायै नमः हृदये।**

**ह्लीं बीजाय नमः दक्षिणस्तने।**

**स्वाहा शक्तिये नमः वामस्तने।**

**क्लीं कीलकाय नमः नाभौ।**

| **करन्यास** | **अंगन्यास** |
|---|---|
| **ह्लां अंगुष्ठाभ्यां नमः।** | **ह्लां हृदयाय नमः।** |
| **ह्लीं तर्जनीभ्यां स्वाहा।** | **ह्लीं शिरसे स्वाहा।** |
| **ह्लूं मध्यमाभ्यां वषट्।** | **ह्लूं शिखायै वषट्।** |
| **ह्लैं अनामिकाभ्यां हुं।** | **ह्लैं कवचाय हुं।** |
| **ह्लौं कनिष्ठिकाभ्यां वौषट्।** | **ह्लौं नेत्र-त्रयाय वौषट्।** |
| **ह्लः करतलकरपृष्ठाभ्यां फट्।** | **ह्लः अस्त्राय फट्।** |

Wondershare PDFelement

Remove Watermark Wondershare PDFelement

**व्यापक न्यास : ॐ ह्लीं अंगुष्ठाभ्यां नमः। ॐ बगलामुखि तर्जनीभ्यां स्वाहा। ॐ सर्व दुष्टानां मध्यमाभ्यां वषट्। ॐ वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुं। ॐ जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्। ॐ बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतल कर पृष्ठाभ्यां फट्।**

इसी प्रकार मूल मन्त्र से **अंगन्यास** करें –

**ॐ ह्लीं हृदयाय नमः।**

**ॐ बगलामुखि शिरसे स्वाहा।**

**ॐ सर्वदुष्टानां शिखायै वषट्।**

**ॐ वाचं मुखं पदं स्तम्भय कवचाय हुम्।**

**ॐ जिह्वां कीलय नेत्र-त्रयाय वौषट्।**

**ॐ बुद्धिं विनाशय ह्लीं ॐ स्वाहा, अस्त्राय फट्।**

Wondershare PDFelement

**ध्यान**

**मध्ये सुधाब्धि-मणि-मण्डप-रत्नवेद्यां,**
**सिंहासनों परिगतां परिपीतवर्णाम्।**
**पीताम्बराभरण-माल्य-विभूषितांगी,**
**देवीं स्मरामि धृत-मुद्गर-वैरि-जिह्वां।**

इसके उपरान्त मानस पूजा करें –

**श्री पीताम्बरायै नमः लं पृथिव्यात्मकं गन्धं परिकल्पयामि।**

**श्री पीताम्बरायै नमः हं आकाशात्मकं पुष्पं परिकल्पयामि।**

**श्री पीताम्बरायै नमः यं वायव्यात्मकं धूपं परिकल्पयामि।**

**श्री पीताम्बरायै नमः वं अमृतात्मकं नैवेद्यं परिकल्पयामि।**

Remove Watermark Wondershare PDFelement

इसके उपरान्त महामाया को योनिमुद्रा से प्रणाम करके स्तोत्र का पाठ करें–

## पञ्जर स्तोत्र

**पञ्जरं तत्प्रवक्ष्यामि देव्याः पापप्रणाशनम्।**
**यं प्रविश्य न बाधन्ते बाणैरपि नराः क्वचित।।१।।**
**ॐ ऐं ह्लीं श्रीं श्रीमत् पीताम्बरा देवी, बगला बुद्धि-वर्द्धिनी।**
**पातु मामनिशं साक्षात्, सहस्रार्क-समद्युति।।२।।**
**ॐ ऐं ह्लीं श्रीं शिखादि-पाद-पर्यन्तं, वज्र-पञ्जर-धारिणी।**
**ब्रह्मास्त्र-संज्ञा या देवी, पीताम्बरा-विभूषिता।।३।।**
**ॐ ऐं ह्लीं श्रीं श्री बगला ह्यवत्वत्र, चोधर्व-भागं महेश्वरी।**
**कामांकुशाकला पातु, बगला शास्त्र बोधिनी।।४।।**
**ॐ ऐं ह्लीं श्रीं पीताम्बरा सहस्राक्षा ललाटं कामितार्थदा।**
**पातु मां बगला नित्यं, पीताम्बर सुधारिणी।।५।।**
**ॐ ऐं ह्लीं श्रीं कर्णयोश्चैव युग-पदति-रत्न प्रपूजिता।**
**पातु मां बगला देवी, नासिकां मे गुणाकर।।६।।**
**ॐ ऐं ह्लीं श्रीं पीत-पुष्पैः पीत-वस्त्रैः, पूजिता वेददायिनी।**
**पातु मां बगला नित्यं, ब्रह्म-विष्णवादि-सेविता।।७।।**
**ॐ ऐं ह्लीं श्रीं पीताम्बरा प्रसन्नास्या, नेत्रयोर्युग-पद्-भ्रुवौ।**
**पातु मां बगला नित्यं, बलदा पीत-वस्त्र-धृक्।।८।।**
**ॐ ऐं ह्लीं श्रीं अधरोष्ठौ तथा दन्तान्, जिह्वां च मुखगां मम।**
**पातु मां बगला देवी, पीताम्बर सुधारिणी।।९।।**
**ॐ ऐं ह्लीं श्रीं गले हस्ते तथा वाह्वोः, युग-पद्-बुद्धिदा-सताम्।**

Remove Watermark Wondershare PDFelement

पातु मां बगला देवी, दिव्य-स्रगनुलेपना॥१०॥
ॐ ऐं ह्लीं श्रीं हृदये च स्तनौ नाभौ, करावपि कृशोदरी।
पातु मां बगला नित्यं, पीत-वस्त्र घनावृता॥११॥
जङ्घायां च तथा चोर्वोः गुल्फयोश्चाति-वेगिनी।
अनुक्तमपि यत् स्थानं, त्वक्-केश-नख-लोमकम्॥१२॥
असृङ् मांस तथाऽस्थीनी, सन्धयश्चापि मे परा।
ताः सर्वाः बगला देवी, रक्षेन्मे च मनोहरा॥१३॥
इत्येतद् वरदं गोप्यं कलावपि विशेषतः
पञ्जरं बगला देव्याः घोर दारिद्र्य नाशनम्।
पञ्जरं यः पठेत् भक्त्या स विघ्नैर्नाभिभूतये॥१४॥
अव्याहत गतिश्चास्य ब्रह्मविष्णवादि सत्पुरे।
स्वर्गे मर्त्ये च पाताले नाऽरयस्तं कदाचन॥१५॥
न बाधन्ते नरव्याघ्र पञ्जरस्थं कदाचन।
अतो भक्तैः कौलिकैश्च स्वरक्षार्थं सदैव हि॥१६॥
पठनीयं प्रयत्नेन सर्वानर्थ विनाशनम्।
महा दारिद्र्य शमनं सर्वमांगल्यवर्धनम्॥१७॥
विद्या विनय सत्सौख्यं महासिद्धिकरं परम्।
इदं ब्रह्मास्त्रविद्यायाः पञ्जरं साधु गोपितम्॥१८॥
पठेत् स्मरेत् ध्यानसंस्थः स जयेन्मरणं नरः।
यः पञ्जरं प्रविश्यैव मन्त्रं जपति वै भुवि॥१९॥
कौलिकोऽकौलिको वापि व्यासवद् विचरेद् भुवि।
चन्द्रसूर्य समोभूत्वा वसेत् कल्पायुतं दिवि॥२०॥

Wondershare PDFelement

Remove Watermark Wondershare PDFelement

**श्री सूत उवाच**

**इति कथितमशेषं श्रेयसामादिबीजम्।**
**भवशत दुरितघ्नं ध्वस्तमोहान्धकारकम्।**
**स्मरणमतिशयेन प्राप्तिरेवात्र मर्त्यः।**
**यदि विशति सदा वै पञ्जरं पण्डितः स्यात्॥२१॥**

॥ इति परम रहस्याति रहस्ये पीताम्बरा पञ्जर-स्तोत्रम्॥

## पञ्जरन्यासस्तोत्रम्

इस पञ्जर न्यास-स्तोत्र का पाठ जपादि से पूर्व करना चाहिए। इस स्तोत्र का पाठ करने पर साधक के चारों ओर साक्षात् माँ भगवती पीताम्बरा का अभेद्य कवच बन जाता है। उसके स्मरण मात्र से ही शत्रुओं की गति, मति, वाचा और बुद्धि) स्तम्भित हो जाते हैं।

**अथ पञ्जरन्यासस्तोत्रम्**

**बगला पूर्वतो रक्षेद् आग्नेय्यां च गदाधरी।**
**पीताम्बरा दक्षिणे च स्तम्भिनी चैव नैर्ऋते॥१॥**
**जिह्वाकीलिन्यतो रक्षेत् पश्चिमे सर्वदा हि माम्।**
**वायव्ये च मदोन्मत्ता कौबेर्यां च त्रिशूलिनी॥२॥**
**ब्रह्मास्त्रदेवता पातु ऐशान्यां सततं मम।**
**संरक्षेन् मां तु सततं पाताले स्तब्धमातृका॥३॥**
**ऊर्ध्वं रक्षेन्महादेवी जिह्वास्तम्भनकारिणी।**
**एवं दश दिशो रक्षेद् बगला सर्वसिद्धिदा॥४॥**
**एवं न्यासविधिं कृत्वा यत् किञ्चिज्जपमाचरेत्।**